## षष्ठाध्यायस्य
## द्वितीयः पादः

### बहुव्रीहौ प्रकृत्या पूर्वपदम् । (१/३७३७)

पूर्वपदग्रहणं [1]अत्र पूर्वपदस्थे स्वरे उदात्ते स्वरिते वा वर्तते। बहुव्रीहौ समासे पूर्वपदस्य यः स्वरः स प्रकृत्या भवति, स्वभावेनावतिष्ठते, न विकारमनु[2]दात्तत्वमापद्यते । समासान्तोदात्तत्वे हि सति 'अनुदात्तं पदमेकवर्जम्' (६.१.१५८/३६५०) इति [3]सोऽनुदात्तः स्यात् इति समासान्तोदात्तत्वापवादोऽयमारभ्यते । कार्ष्णोत्तरासङ्गः। कृष्णो मृगः तस्य विकारः कार्ष्णः, 'प्राणिरजतादिभ्योऽञ्' (४.३.१५४/१५३२) इति अञ्प्रत्ययान्तो ञित्स्वरेणाद्युदात्तः। यूपवलजः । यूपशब्दः उणादिषु 'कुसुयुभ्यश्च' (उ. ३१३.३१४) इति पप्रत्ययान्तः। तत्र च दीर्घः इति निदिति च वर्तते, तेनाद्युदात्तः । ब्रह्मचारिपरिस्कन्दः । ब्रह्मचारिशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । स्नातकपुत्रः । स्नातकशब्दः कन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । अध्यापकपुत्रः । लित्स्वरेणाध्यापकशब्दो मध्योदात्तः । श्रोत्रियपुत्रः। श्रोत्रियशब्दो नित्वादाद्युदात्तः । मनुष्यनाथः । मनुष्यशब्दः 'तित् स्वरितम्' (६.१.१८५/३७९९) इति स्वरितान्तः । उदात्तग्रहणं स्वरितग्रहणं चात्रानुवर्तते, तेन सर्वानुदात्ते पूर्वपदे विधिरेव नास्ति इति समासान्तोदात्तत्वं [4]भवति । समभागः इति समशब्दो हि सर्वानुदात्तः ॥

### तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः । (२/३७३८)

[5]तत्पुरुषे समासे तुल्यार्थं तृतीयान्तं सप्तम्यन्तम् उपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत् पूर्वपदं तत् प्रकृतिस्वरं भवति । तुल्यार्थ – तुल्यश्वेतः । तुल्यलोहितः । तुल्यमहान् । सदृक्श्वेतः । सदृशमहान् । एते 'कृत्यतुल्याख्या अजात्या' (२.१.६८/७४९) इति कर्मधारयाः । तत्र तुल्यशब्दः 'यतोऽनावः' (६.१.२१३/३७०१) इत्याद्युदात्तः । सदृक्शब्दः 'समानान्ययोश्च' (वा. २६१) इति क्विन्प्रत्ययान्तः, कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । सदृशशब्दोऽपि कञन्तो मध्योदात्तः । तुल्यार्थ ।

तृतीया – [6]शङ्कुलया खण्डः शङ्कुलाखण्डः । किरिणा काणः किरिकाणः । शङ्कुपूर्वाल् लातेः 'घञर्थे कविधानम्' (वा. ३०६) इति वा कप्रत्ययान्तः शङ्कुलाशब्दोऽन्तोदात्तः । किरिशब्दोऽपि किरतेः 'कॄगॄशॄपकुटिभिदिच्छिदिभ्यश्च' (उ. ५९२) इति [7]इकारप्रत्ययः किदौणादिकः, तेनासावन्तोदात्तः । [8]तृतीया ।

सप्तमी – अक्षेषु शौण्डः अक्षशौण्डः । पानशौण्डः । 'अशेर्देवने' (उ. ६४०) इति सप्रत्ययान्तोऽक्षशब्दोऽन्तोदात्तः । पानशब्दो ल्युडन्तो लित्स्वरेण आद्युदात्तः । सप्तमी ।

---

1. अत्र नास्ति फ. 2. अनुदात्तत्वं नास्ति ब. 3. अनुदात्तत्वं फ. 4. एव इत्यधिकम् फ. 5. प्रकृत्या पूर्वपदमिति वर्तते इत्यधिकम् फ. ह. 6. शङ्कुलया खण्डः नास्ति फ. 7. इप्रत्ययान्तः फ. 8. ततीया नास्ति फ.